# || विष्णु रक्षा कवच स्तोत्रम् ||

महेश्वर उवाच
प्रणम्याजरमीशानं अजं नित्यमनामयम् |
देवं सर्वेश्वरं विष्णुं सर्वव्यापिनमव्ययम् ||

बध्नाम्यहं प्रतिसरं नमस्कृत्य जनार्दनम् |
अमोघमप्रतिहतं सर्वदुष्टनिवारणम् ||

ॐ विष्णुर्मामग्रतः पातु कृष्णो रक्षतु पृष्ठतः |
हरिर्मे रक्षतु शिरो हृदयं च जनार्दनः ||

मनो मम हृषीकेशो जिह्वां रक्षतु केशवः |
पातु नेत्रे वासुदेवः श्रोत्रे सङ्कर्षणस्तथा ||

प्रद्युम्नः पातु मे प्राणमनिरुद्धो मुखं मम |
वनमाली गळं पातु श्रीवक्षो रक्षतात्पुरः ||

पार्श्वं तु पातु मे चक्रं वामं दैत्यविदारणम् |
दक्षिणं तु गदादेवी सर्वासुरनिवारिणी ||

उदरं मुसली पातु पृष्ठं पातु च लाङ्गली |
ऊरू रक्षतु शार्ङ्गी मे जङ्घे रक्षतु चर्मकी ||

पाणी रक्षतु शङ्खी च पादौ मे चरणावुभौ |
सर्वकार्यार्थसिद्ध्यर्थं पातु मां गरुडध्वजः ||

वराहो रक्षतु जले विषमेषु च वामनः |
अटव्यां नरसिंहस्तु सर्वतः पातु केशवः ||

हिरण्यगर्भो भगवान् हिरण्यं मे प्रयच्छतु |
सांख्याचार्यस्तु कपिलो धातुसाम्यं करोतु मे ||

श्वेतद्वीपनिवासी च श्वेतद्वीपं नयत्वजः |
सर्वान् शत्रून् सूदयतु मधुकैटभसूदनः ||

विकर्षयतु सदा विष्णुः किल्बिषं मम विग्रहात् |
हंसो मत्स्यस्तथा कूर्मः पातु मां सर्वतो दिशम् ||

त्रिविक्रमस्तु मे देवः सर्वान् पाशान् निकृन्ततु |
नरनारायणो देवो बुद्धिं पालयतां मम ||

शेषोऽशेषामलज्ञानः करोत्वज्ञाननाशनम् |
वडवामुखो नाशयतु कल्मषं यन्मया कृतम् ||

विद्यां ददातु परमामश्वमूर्धा मम प्रभुः |
दत्तात्रेयः पालयतु सपुत्रपशुबान्धवम् ||

सर्वान् रोगान् नाशयतु रामः परशुना मम |
रक्षोघ्नो मे दाशरथिः पातु नित्यं महाभुजः ||

रिपून् हलेन मे हन्याद्रामो यादवनन्दनः |
प्रलम्बकेशिचाणूरपूतनाकंसनाशनः ||

कृष्णो यो बालभावेन स मे कामान् प्रयच्छतु |
अन्धकारं तमो घोरं पुरुषं कृष्णपिङ्गलम् ||

पश्यामि भयसन्तप्तः पाशहस्तमिवान्तकम् |
ततोऽहं पुण्डरीकाक्षमच्युतं शरणं गतः ||

योगीशमतिरूपस्थं शुभ्रशीताम्शुनिर्मलम् |
धन्योऽहं विजयी नित्यं यस्य मे भगवान् हरिः ||

स्मृत्वा नारायणं देवं सर्वोपद्रवनाशनम् |
वैष्णवं कवचं बद्ध्वा विचरामि महीतले ||

अप्रधृष्योऽस्मि भूतानां सर्वं विष्णुमयोऽस्म्यहम् |
स्मरणाद्देवदेवस्य विष्णोरमिततेजसः ||

सिद्धिर्भवतु मे नित्यं तथा मन्त्र उदाहृतः |
यो मां पश्यति चक्षुर्भ्यां यं च पश्यामि चक्षुषा ||

सर्वासां समदृष्टीनां विष्णुर्बध्नातु चक्षुषा |
वासुदेवस्य यच्चक्रं तस्य चक्रस्य ये अराः ||

ते च च्छिन्दन्तु मे पापं मा मे हिंसन्तु हिंसकाः |
राक्षसेषु पिशाचेषु कान्तारेष्वटवीषु च ||

विवादे राजमार्गेषु द्यूतेषु कलहेषु च |
नदीसन्तरणे घोरे सम्प्राप्ते प्राणसङ्कटे ||

अग्निचोरनिपाते च सर्वग्रहनिवारणे |
विद्युत्सर्पविषोद्योगे खातोदे रिपुसङ्कटे ||

तथ्यमेतज्जपेन्नित्यं शरीरे भय आगते |
अयं भगवतो मन्त्रो मन्त्राणां परमो महान् ||

विख्यातं कवचं गुह्यं सर्वपापप्रणाशनम् ।
स्वमायाकृतनिर्माणं कल्पान्तगृहलोपकृत् ।
अनाद्यं तज्जगद्बीजं पद्मनाभ नमोऽस्तु ते ॥

ॐ कालाय स्वाहा ।
ॐ कालपुरुषाय स्वाहा ।
ॐ प्रचण्डाय स्वाहा ।
ॐ प्रचण्डपुरुषाय स्वाहा ।
ॐ सर्वाय स्वाहा ।
ॐ सर्वसर्वाय स्वाहा ।
ॐ नमो भुवनेशाय त्रिलोकधाम्ने इतिटिपिरिटि स्वाहा ।

ॐ उत्तमेनाघे तु मे ये सत्त्वाः पापानुचारास्तेषां दैत्यदानव यक्ष राक्षस भूतप्रेतपिशाच कूष्माण्डापस्मारोन्मादन ज्वराणां एकाहिक द्वितीयक तार्तीयक चतुर्थिक मौहूर्तिक दिनज्वर रात्रिज्वर सततज्वर सन्ध्याज्वर सर्वज्वरादीनां उत्सादनलूताकीटक कङ्टक कटपूतनाभुजग स्थावरविष विषमविषादीनामिदं शरीरं ममाप्रधृष्यं भवतु ॐ सुकारे प्रकारोत्कटक विकटदंष्ट्र पूर्वतो रक्ष । ॐ हैं हैं हैं हैं दिनकरसहस्रकान्तसमोग्रतेजाः पश्चिमतो रक्षरक्ष । ॐ निरिनिरि प्रदीप्त ज्वलनज्वालाकाल महाकपिलजटिल उत्तरतो रक्ष । ॐ चिलिचिलिमिलि मिलिचेकडि गौरिगान्धारि विषोहनि विषं मां मोहयतु स्वाहा दक्षिणतो रक्ष माममुकस्य सर्वभूतभयोपद्रवेभ्यः स्वाहा ।

आद्यन्तवन्तः कवयः पुराणाः सूक्ष्मा बृहन्तो ह्यनुशासितारः ।
सर्वज्वरान् घ्नन्तु ममानिरुद्धप्रद्युम्नसङ्कर्षणवासुदेवाः ॥

॥ इति श्रीविष्णुधर्मोत्तरे प्रथमखण्डे मार्कण्डेय वज्रसंवादे विष्णुकवचं नाम सप्तत्रिंशदुत्तर द्विशततमोऽध्यायः ॥

|| viṣṇu rakṣā kavaca stotram ||

maheśvara uvāca
praṇamyājaramīśānaṃ ajaṃ nityamanāmayam |
devaṃ sarveśvaraṃ viṣṇuṃ sarvavyāpinamavyayam ||

badhnāmyahaṃ pratisaraṃ namaskṛtya janārdanam |
amoghamapratihataṃ sarvaduṣṭanivāraṇam ||

OM viṣṇurmāmagrataḥ pātu kṛṣṇo rakṣatu pṛṣṭhataḥ |
harirme rakṣatu śiro hṛdayaṃ ca janārdanaḥ ||

mano mama hṛṣīkeśo jihvāṃ rakṣatu keśavaḥ |
pātu netre vāsudevaḥ śrotre saṅkarṣaṇastathā ||

pradyumnaḥ pātu me prāṇamaniruddho mukhaṃ mama |
vanamālī gaḻaṃ pātu śrīvakṣo rakṣatātpuraḥ ||

pārśvaṃ tu pātu me cakraṃ vāmaṃ daityavidāraṇam |
dakṣiṇaṃ tu gadādevī sarvāsuranivāriṇī ||

udaraṃ musalī pātu pṛṣṭhaṃ pātu ca lāṅgalī |
ūrū rakṣatu śārṅī me jaṅghe rakṣatu carmakī ||

pāṇī rakṣatu śaṅkhī ca pādau me caraṇāvubhau |
sarvakāryārthasiddhyarthaṃ pātu māṃ garuḍadhvajaḥ
||

varāho rakṣatu jale viṣameṣu ca vāmanaḥ |
aṭavyāṃ narasiṃhastu sarvataḥ pātu keśavaḥ ||

hiraṇyagarbho bhagavān hiraṇyaṃ me prayacchatu |
sāṃkhyācāryastu kapilo dhātusāmyaṃ karotu me ||

śvetadvīpanivāsī ca śvetadvīpaṃ nayatvajaḥ |

sarvān śatrūn sūdayatu madhukaiṭabhasūdanaḥ ||

vikarṣayatu sadā viṣṇuḥ kilbiṣaṃ mama vigrahāt |
haṃso matsyastathā kūrmaḥ pātu māṃ sarvato diśam ||

trivikramastu me devaḥ sarvān pāśān nikṛntatu |
naranārāyaṇo devo buddhiṃ pālayatāṃ mama ||

śeṣo.aśeṣāmalajñānaḥ karotvajñānanāśanam |
vaḍavāmukho nāśayatu kalmaṣaṃ yanmayā kṛtam ||

vidyāṃ dadātu paramāmaśvamūrdhā mama prabhuḥ |
dattātreyaḥ pālayatu saputrapaśubāndhavam ||

sarvān rogān nāśayatu rāmaḥ paraśunā mama |
rakṣoghno me dāśarathiḥ pātu nityaṃ mahābhujaḥ ||

ripūn halena me hanyādrāmo yādavanandanaḥ |
pralambakeśicāṇūrapūtanākaṃsanāśanaḥ ||

kṛṣṇo yo bālabhāvena sa me kāmān prayacchatu |
andhakāraṃ tamo ghoraṃ puruṣaṃ kṛṣṇapiṅgalam ||

paśyāmi bhayasantaptaḥ pāśahastamivāntakam |
tato.ahaṃ puṇḍarīkākṣamacyutaṃ śaraṇaṃ gataḥ ||

yogīśamatirūpasthaṃ śubhraśītāmśunirmalam |
dhanyo.ahaṃ vijayī nityaṃ yasya me bhagavān hariḥ ||

smṛtvā nārāyaṇaṃ devaṃ sarvopadravanāśanam |
vaiṣṇavaṃ kavacaṃ baddhvā vicarāmi mahītale ||

apradhṛṣyo.asmi bhūtānāṃ sarvaṃ viṣṇumayo.asmyaham |
smaraṇāddevadevasya viṣṇoramitatejasaḥ ||

siddhirbhavatu me nityaṃ tathā mantra udāhṛtaḥ |
yo māṃ paśyati cakṣurbhyāṃ yaṃ ca paśyāmi cakṣuṣā
||

sarvāsāṃ samadṛṣṭīnāṃ viṣṇurbadhnātu cakṣuṣā |
vāsudevasya yaccakraṃ tasya cakrasya ye arāḥ ||

te ca cchindantu me pāpaṃ mā me hiṃsantu hiṃsakāḥ |
rākṣaseṣu piśāceṣu kāntāreṣvaṭavīṣu ca ||

vivāde rājamārgeṣu dyūteṣu kalaheṣu ca |
nadīsantaraṇe ghore samprāpte prāṇasaṅkaṭe ||

agnicoranipāte ca sarvagrahanivāraṇe |
vidyutsarpaviṣodyoge khātode ripusaṅkaṭe ||

tathyametajjapennityaṃ śarīre bhaya āgate |
ayaṃ bhagavato mantro mantrāṇāṃ paramo mahān ||

vikhyātaṃ kavacaṃ guhyaṃ sarvapāpapraṇāśanam |
svamāyākṛtanirmāṇaṃ kalpāntagṛhalopakṛt |
anādyaṃ tajjagadbījaṃ padmanābha namo.astu te ||

OM kālāya svāhā |
OM kālapuruṣāya svāhā |
OM pracaṇḍāya svāhā |
OM pracaṇḍapuruṣāya svāhā |
OM sarvāya svāhā |
OM sarvasarvāya svāhā |
OM namo bhuvaneśāya trilokadhāmne itiṭipiriṭi svāhā
|

OM uttamenāghe tu me ye sattvāḥ pāpānucārāsteṣāṃ
daityadānava yakṣa rākṣasa bhūtapretapiśāca
kūṣmāṇḍāpasmāronmādana jvarāṇāṃ ekāhika dvitīyaka

tārtīyaka caturthika mauhūrtika dinajvara
rātrijvara satatajvara sandhyājvara sarvajvarādīnāṃ
utsādanalūtākīṭaka kaṅṭaka kaṭapūtanābhujaga
sthāvaraviṣa viṣamaviṣādīnāmidaṃ śarīraṃ
mamāpradhṛṣyaṃ bhavatu OM sukāre prakārotkaṭaka
vikaṭadaṃṣṭra pūrvato rakṣa | OM haiṃ haiṃ haiṃ
haiṃ dinakarasahasrakāntasamogratejāḥ paścimato
rakṣarakṣa | OM niriniri pradīpta jvalanajvālākāla
mahākapilajaṭila uttarato rakṣa | OM cilicilimili
milicekaḍi gaurigāndhāri viṣohani viṣaṃ māṃ
mohayatu svāhā dakṣiṇato rakṣa māmamukasya
sarvabhūtabhayopadravebhyaḥ svāhā |

ādyantavantaḥ kavayaḥ purāṇāḥ sūkṣmā bṛhanto
hyanuśāsitāraḥ |
sarvajvarān ghnantu
mamāniruddhapradyumnasaṅkarṣaṇavāsudevāḥ ||

|| iti śrīviṣṇudharmottare prathamakhaṇḍe
mārkaṇḍeya vajrasaṃvāde viṣṇukavacaṃ nāma
saptatriṃśaduttara dviśatatamo.adhyāyaḥ ||

www.kamakotimandali.com